JAN I

# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 03-02-2013 अङ्काः-100

पूर्वाह्ने - 10-00 तः 1-00 पर्यन्तम् समयः-घण्टात्रयम्

**1 एकेन वाक्येन उत्तरं लिखत :- (अष्टानाम्)** 8

1. हर्षवर्धनस्य पिता कः ?
2. भवभूतिविरचितस्य नाटकस्य नाम किम् ?
3. चित्रलेखा का ?
4. कालिदासस्य खण्डकाव्ये के ?
5. वने निस्स्पृपृहाणां शय्या किम् ?
6. लवकुशयोः ज्यायान् कः ?
7. कालिदासीयनाटककथामञ्जरी केन लिखितम् ?
8. नायकस्य अपरं नाम किम् ?
9. दानवः केशी कुत्र उवास ?
10. केन महानपि रिपुः उन्मूलयितुं सुकरः ?
11. यौवनमदान्धानां गुरवः कीदृशाः ?
12. चन्द्रापीडः केन उपदिष्टः ?

**2 वाक्यद्वयेन षण्णाम् उत्तरं लिखत :-** 12

1. सिद्धवेषधरः कथं रराज ?
2. अनयपरम्परा का ?
3. यदा परशुरामः भीष्मेण जितः तदा किम् अभवत् ?
4. मदस्य अनर्थहेतुत्वं उपपादयत ?
5. भीष्मेण वन्दितः परशुरामः किमिति आशासे ?



पश्चादनुवर्तते

6. हर्षवर्धनस्य जननसमये किम् अभवत् ?
7. यशोवती का ? सा कथं बभूव ?
8. श्री नृसिंहभारतीस्वामिनः स्वेन कानि न कृतानि इति निवेदयन्ति ?

**3 पञ्चैः वाक्यैः त्रयाणाम् उत्तरं लिखत ।** 9

1. मस्करी पुण्यभूतिम् उपेत्य किमवोचत् ? किम् अदाच्च ?
2. पुण्यभूतेः सहायकाः के ? तेषां नाम, शौर्यं च सूचयत ।
3. सिद्धवेषधरः कानि कानि विस्मयावहानि चकार ?
4. ''परशुरामेण युद्धं मा कुरु'' इति मात्रा उपदिष्टः भीष्मः किमुत्तरं ददौ ?
5. विश्वावसुजनन्या कञ्चुकी किमिति आदिष्टः ?
   सः आदेशानुरूपं किं चकार ?

**4 त्रयाणां सप्रसङ्गं विवरणं कुरुत ।** 9

1. वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।
2. वैराग्यं मोक्षवाञ्छामपि लघु कलय ।
3. विपदन्ताः ह्यविनीतसम्पदः ।
4. तस्यां तस्यां प्रियसुते माता भूयाः त्वमेव नः ।
5. स्थीयते अन्यत्र अकार्यात् ।

**5 पद्यद्वयं पूर्णं लिखत ।** 6

1. कल्यादौ...................................... मह्यम् ।।
2. सच्चित् रूपान्मनो ................................ मह्यम् ।।
3. मतिभेदतमः ....................................... इवार्थदर्शनम् ।।

**6 एकस्य पद्यस्य सान्वयं अर्थं लिखत ।** 4

1. कबलीकृतकोमलेक्षुणा करिणा तत्र विमानवर्तिना ।
   जगृहे नृपकण्ठमालिकामणिहारोऽपि मृणालकोमलः ।।

2. सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।

शरीरकस्यापि कृते मूढाः पापानि कुर्वते ।।

**7** **एकस्य कवेः देश-काल-कृति वैशिष्ट्य विषये लिखत ।** 4

1. लक्ष्मणसूरिः 2. भवभूतिः

**8** **चतुर्णां रूपाणि परिचाययत ।** 4

1. प्रथयन् 2. वाजिनः 3. मृगीदृशां
4. सविधे 5. दार्षदः 6. ईशे

**9** **चत्वारि पदानि वाक्ये योजयत ।** 4

1. रथः 2. क्षत्रबन्धुः 3. यज्वा
4. क्षपायां 5. प्रतिपत्तिः 6. नरनाथेन

**10** **चतुर्णां पर्यायपदानि लिखत ।** 4

1. हरिदश्वः 2. अभ्रम् 3. द्विरदः
3. आशीविषः 5. दरी 6. शतक्रतुः

**11** **चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत ।** 4

1. गिरैव 2. व्यतरद्द्विषजां 3. तान्याशु
4. मातस्त्वत्पादपद्मे 5. देवांश्च 6. नैकानि

**12** **चतुर्णां एकं पदं लिखत ।** 4

1. परीक्षितुम् इच्छा 2. गन्तुम् इच्छा 3. अन्तर्धानमगमत्
4. सुरराड्वाहनम् 5. गुणाः अस्मिन् सन्ति इति 6. तत्त्वं जानाति इति



पश्चादनुवर्तते

**13** **चतुर्णां व्याकरणविशेषं लिखत ।** 8

1. दार्षदः 2. अलमस्मै कर्मणे 3. भवन्तम् उपतिष्ठते
4. भगवते रोचते 5.सुदिनायते 6. विजयस्व

**14** **चतुर्णां विग्रहवाक्यानि विलिख्य समास नाम लिखत ।** 8

1. हितवादिने 2. बन्धुवर्गः 3. मृदुमधुरया
4. महासत्वः 5. पञ्चपात्रम् 6. यथामति

**15** **द्वयोः तत्तल्लकारे सर्वाणिरूपाणि लिखत ।** 6

1. वर्तेत 2. जगाम 3. रक्षतु
4. लेभे 5. अजायत

**16** **रिक्तस्थानं पूरयत । (चतुर्णाम्)** 4

1. अखिलं हि हिनस्ति भूधरं ........................... ।
2. अनया परिगृहीता ........................... भवन्ति राजानः ।
3. ........................... सरस्वत्याः वरपुत्रः इति प्रख्यातः ।
4. अवधूतपदेनिषेदुषां अभिधा ........................... इति ।
5. ........................... हि पतङ्गस्योदये पुण्डरीकम् ।

* * * * *